CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B

Coll. No. 187

Title Rudra Pūjā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 187 Subject: Tantric Ritual

Title: Rudra Pūjā from Rudra vidhāna.

Author: — Scribe: Ramāśa ...

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 6.7" by 4" Extent: 12 Foll.

Language: Sanskrit Script: Devanāgarī.

Remarks: incomplete ... [illegible]

॥अथरुद्रविधानेरुद्रन्यासः॥ॐकारंमूर्द्ध्निविन्यस्यनकारं
नासिकांतरे॥मोकारंचललाटेचभकारंमुखमं
ध्यतः॥गकारंकंठदेशेतुवकारंहृदयेन्यसेत॥ते
कारंदक्षिणेहस्तेरुकारंवामतोन्यसेत॥द्राकारं
विन्यसेन्नाभौयकारंपादयोःन्यसेत॥शिरसिवि
न्यसेद्रुद्रंललाटेचंद्रशेखरं॥नेत्रयोस्त्रिलोचनंदेवं
भैरवंश्रोत्रयोर्न्यसेत॥घ्राणेतुशंकरंदेवंमु
खेपशुपतिंतथा॥नीलकंठंकंठदेशेहृदयेव्यापकं

न्यसेत्॥ करोगंगाधरं देवं शिवं नाभ्यां तु विन्यसेत्॥
वामदेवं तथा गुह्ये ऊर्वोर्देवं च त्र्यंबकं॥ सर्वं जंघयो
र्न्यस्य पादयोश्च कपर्दिनं॥ पुनः॥ ललाटे तु शिवं विद्या
त्कंठे रुद्रं समाश्रितं॥ नाभिं उन्नमीशानं नाभुन्या
सीकरं तथा॥ पादयोश्च तथानंतं शिवं सर्वत्र चिंतयेत्।
आत्मानं शिवरूपं विभाव्य॥ पुनः॥ पादयोः रुद्राय०॥ ऊ २
रुभ्यां कूर्माय नमः॥ कंठे नीलकंठाय०॥ ललाटे शशि
भूषणाय०॥ शिरसि शिवाय०॥ शिखायां सदाशिवाय०॥

पुनः॥ सद्यं तु पादयोर्न्यस्य वामं मूर्ध्नोस्तु मध्यतः॥ अ
घोरं हृदये न्यस्य तत्पुरुषं मुखमध्यतः॥ ईशानं मूर्ध्नि
विन्यस्य पंचवक्त्रः प्रकीर्तिताः॥ हंस हंसेति यो ब्रू
या ईसो नाम सदाशिवः॥ शं करेण कृता रक्षा सर्व
काम प्रदायिनी॥ एवं न्यासविधिं कृत्वा दिक्पाला
न्परितोन्यसेत्॥ एवमात्मनि रौद्रीकरणं कृत्वा त्वग
स्थिगतैः पापैः संप्रमुच्यते सधोरोगेभ्यः प्रमुच्यते।
यक्षरक्षःपिशाचभूतप्रेतयमगणाकिनी सर्पश्चाप

दतस्कराद्युपद्रवाःसर्वेनश्यंतिपश्यंतीति॥एवंवि
धंरुद्ररूपंध्यायेत्।नीलग्रीवंत्रिनेत्रंस्फटिकम
णिनिभंव्याघ्रचर्मोत्तरीयंपंचास्यंचंद्रचूडंदशभु
जंसाहितंसर्वभूषाभिरामं॥अर्द्धांगेसंदधानं
कपिलजटमुमांसर्वदिग्व्यापिसोम्यंव्यालैश्च २
ज्वलंतंडमरुकमुदपात्रंकरस्थंवहंतं॥
नभःस्वभ्रूधंदिग्बाहोभूपादंगगनोदरं॥चंद्र
सूर्याग्निनेत्रायस्योविश्वरूपोजगत्पते।एवंध्या

त्वाततःसम्यक्ततोपजनमारभेत॥उत्तिष्ठं
तुमहद्भूतायेचात्रस्थानवासिनः।भूतानां
मविरोधेनरुद्रपूजनमारभेत्॥वक्ष्यमाण
षोडशप्रकारादिविधिनारुद्रंसंपूज्यततः
पंचवक्त्राणांपूजा॥अथरुद्रपूजनविधिः॥
चत्वारिशृंगेत्यस्यवामदेवोऽग्निस्त्रिष्टुप्।
आवाहनेविनियोगः॥कएवोरुद्रेगायत्री

मानस्तोकेइत्यासनं ।। याःप्रवतइत्यस्यवसि
ष्ठोनदीस्तुतिरितिजगती ।। पाद्येवि०गः ।
विश्वतश्चक्षुरितिविश्वकर्माऋषिः । विश्व
कर्मादेवतात्रिष्टुप् ।। इत्यनेनार्घ्येवि०गः ।।
आपोहिष्ठेत्यस्यमैत्रस्यासिंधुद्वीपआपो ३
गायत्री ।। आचमनेवि०गः । अथपंचामृ
तेनस्नपनं । आप्यायस्वेतिगोतमःसो

मोगायत्री ।। पयःस्नानेवि०गः । दधिक्राव्णइ
त्यस्यवामदेवोदधिक्राव्णोनुष्टुप् ।। दधिस्ना
नेविनियोगः ।। घृतवतीत्यस्यद्यावापृथिव्यो
जगती ।। घृतस्नानेवि०गः । मधुवाताइत्य
स्यगोतमोविश्वेदेवागायत्री ।। मधुस्नानेवि०गः ।
याओषधीरित्यस्यभिषगोषधयोनुष्टुप् ।। रस
स्नपनेवि०गः ।। श्रीवामनपुराणेतुप्रत्येकं

पंचामृतेनपूर्णकलशैः स्नापयित्वा ॥ पुनः ॥ आ
पोहिष्ठेत्या वमनं ॥ मानोमहांतमित्यस्यकुत्सो
रुद्रोजगती ॥ स्नपने वि० ॥ आ० ॥ मानस्तो
कइत्यस्यकुत्सोरुद्रोजगती ॥ वस्त्रदाने वि० ॥
आ० ॥ मानस्तोकइत्यनया यज्ञोपवीतं ॥ आ० ॥ ६
इमारुद्रायेति० चंदनं ॥ मृळानोरुद्रो० ॥ पुष्पं ॥
अश्यामतेसु० ॥ धूपं ॥ त्वेषंवयंरुद्रं० ॥ दीपं ॥

दिवोवराहमरु० ॥ नैवेद्यं ॥ इमारुद्रायस्थिर० ॥ आ०
सहिक्षयेणसम्य० ॥ नमस्कारं ॥ यातेदिद्युद० ॥ प्रद
क्षिणा ॥ इमारुद्रायेतिसूक्तस्थामंत्रानष्टौक्रमे
णयोजनीयाः ॥ ततः पंचवक्त्रपूजा ॥ ॐ सद्योय
नमः ॥ श्वेतवर्णहंसवाहनं पश्चिमवक्त्रं पृथिवी
तत्वब्रह्मणेनमः ॥ ह्रीं श्रं कं बाणमुद्राप्रदर्शनं ॥
ऋद्धिः सिद्धिर्धृतिर्लक्ष्मीर्मेधाकीर्तिः श्रद्धाप्रज्ञा ॥
एताः कलासहितंपूजासद्याभिधानंपश्चिमतः ॥

आशुःशिशानइत्यस्यअप्रतिरथऐंद्रस्त्रिष्टुप्॥स
द्यान्नित्यस्यपश्चिमवक्त्रप्रजननेवि०॥आशुःशि
शानइत्यस्यपश्चिमतःसद्यंप्रपद्येतगंधपुष्पध
पादि॥अथस्तुतिः॥प्रालेयाम०पश्चिमे॥वामाय
नमः॥रक्तवर्णगरुडवाहनउत्तरवक्त्रात्मत ५
त्वविष्णवेनमः॥ह्रींपद्ममुद्राप्रदर्शनं॥रजोरक्तौ
रतिःपाल्याकामासंनिवीनीप्रिया॥बुद्धिःक्रि

याचधात्रीचब्रह्मिणीमोहिनीज्वरा॥एतानित्यःसहि
तंप्रत्येवामानिधानं॥त्र्यंबकमित्यस्यवसिष्ठोरुद्रो
उष्टुप्॥उत्तरतःवामानिधस्यशिववक्त्रप्रजननेवि०॥
त्र्यंबकमित्यनेनचंदनपुष्पधूपादी॥स्तुतिः॥गौ
रंकुंकुमपिं०सर्व॥पूर्ववक्त्रायनमः॥रक्तवर्णक्रौ
ञ्चवाहनपूर्ववक्त्रवायुस्तत्वरुद्रायनमः॥ह्रींकवच
मुद्राप्रदर्शनं॥निवृत्तिःप्रतिष्ठाचविद्याशांति
स्तथैवच॥एताःकलासहितंनत्पुरुषाभिधा

नैऋत्यपूर्वतः॥ तत्पुरुषाय वि० दयात्॥ इति लिं
गपुराणे॥ रुद्रगायत्र्या तत्पुरुषं पूर्वतः प्रपूजयेत्॥
चंदनपुष्पधूपादि॥ स्तुतिः॥ संवर्त्ताग्नितडि० प्र
लिनः॥ अघोराय नमः॥ नीलवर्णं कूर्मवाहनं दक्षि
णवक्त्रे तेनस्तत्व महारुद्राय नमः॥ ॐ ह्रैं ईशानमुद्रां ६
प्रदर्शयेत्॥ नमोमोडा दयात् स्नाव्याधिर्मस्कंः स्तु
ध्यात्पा॥ एताः कलाः सहितं अघोरा निषांहृपन्यै

दक्षिणतः॥ अघोरचक्रुरित्यस्य सावित्रीस्त्रया
स्त्रिष्टुप्॥ अघोरा निर्चैः शिवस्य दक्षिणवक्त्रं प्र
जयेत्॥ चंदनपुष्पधूपादि॥ स्तुतिः॥ कालाभ्र
भ्रमरांजनाचल० मुखं॥ ॐ ईशानाय नमः॥ पी
तवर्णं वृषभवाहनं ऊर्ध्ववक्त्रं आकाशतत्व
व्यक्ताय नमः॥ ॐ हौं महामुद्रां प्र० नं॥ इशिन्यै
गदाऽदामरी चीज्वालिनी तथा॥ एताः कला

सहितंईशानाऽनिर्ध्यंमध्येप्रपूजयेत् ॥ तमीशान
ऽमित्यस्यगोतमोऽविश्वेदेवाऽस्त्रिष्टुप् ॥ तमीशानमि
ऽतिईशानाऽनिर्धेवक्त्रंमध्येप्रपूजयेत् ॥ स्तुतिः ॥
व्याऽक्ताव्यक्तानुगेतरंचवरदंपद्मं॰मयं ॥ गौरी
ऽर्मिमायेत्यनेनश्रीवाऽपूजनं ॥ एतत्परिवारसंयु १
तंरुद्रंपंचवक्त्रंसंपूज्यततःप्रथमावरणस्थापि
तदेवतानुक्रमेणनैवपर्यंतस्थाऽपितरुद्रप
ऽरिवाराणांप्रत्येकंमन्त्रंपूजनं ॥ कर्त्तव्यमिति ॥

पश्चात्सद्योऽनिर्ध्यंवक्त्रंवाममुत्तरतस्तथा ॥ पुरस्ता
त्तल्लिनोवक्त्रंतत्पुरुषंप्रकीऽर्त्तितं ॥ अघोरंदक्षि
णस्यांतुमध्येईशानसंज्ञकं ॥ षडंगान्यपितत्रैव
हृदयादीन्यनुक्रमात् ॥ हृदयंचशिरश्चैवशिखा
वर्मचनेत्रकं ॥ अस्त्रमित्येवमुक्तानिषडंगानि
मनीऽषिभिरिति ॥ २ ॥ विमलोत्कर्षिणीज्ञानाक्रि
यायोगास्तथापरा ॥ प्रज्ञासत्यातथेशानानवमीचा

प्यनुग्नहाॐ कंठे शिवात्मको धर्मो नाले ज्ञानी शिवाश्रयी ।
कर्णिकायां ववाङ्केयी मंडले सौर मैंदवं ॥ ४ ॥ एकाद
शततो रुद्रा अघोराद्याः सशक्तिकाः ॥ अघोरः पशु
पतिः शर्वो विरूपो विश्वरूपिनः ॥ त्र्यंबकश्च कप
र्दी च भैरवः शूलपाणिनः ॥ ईशानश्च महेशानो ६
रुद्रास्त्वेकादश स्मृताः ॥ ५ ॥ अथ शक्तिनामानि ॥
शांता गौरी च रावाणी सुरूपा विश्वरूपिणी ॥ वि
पाक्षी कराली च भैरवी च भयंकरी ॥ ईशानी च

विनिर्दिष्टा तथा माहेश्वरी क्रमात् ॥ शक्तिभिः सह पू
ज्यंते शक्तिस्तेषां तु वामतः ॥ ६ ॥ दलेषु सिद्धयः कल्प्या
अणिमाद्यास्तु पूर्वतः ॥ अणिमा लघिमा चैव महि
मा प्राप्तिरेव च ॥ प्राकाम्यं च तथेशित्वं वशिता चै
व कामिता ॥ ७ ॥ चत्वारश्च चतुर्दिक्षु ब्रह्माद्याश्च त
तः परं ॥ हिरण्यगर्भं पूर्वस्यां विराजं दक्षिणे तथा ॥
कालं पश्चिमदिग्भागे पुरुषं चोत्तरे यजेत् ॥ ८ ॥
इति कोणेषु चत्वारः सांगा वेदाः प्रकीर्तिताः ॥

चत्वारोवेदास्तदंगानिप्रथमावरणेस्मृतौ॥वासुदेवा
दयस्तत्र चत्वारःपूर्वादिक्रमात्॥वासुदेवंपुरस्त
स्यप्रथमावरणेयजेत्॥अनिरुद्धंदक्षिणतःप्रद्यु
म्नंपश्चिमेततः॥सौम्येसंकर्षणंपश्चात्प्रथमा
वरणेत्विदं॥२०॥सत्वंरजस्तमश्चेतिपरिधिश्रि
तयेषुच॥२१॥प्रथमावरणप्रोक्तोदेवतास्थापने
क्रमः॥अथप्रोक्तःक्रमोज्ञेयोद्वितीयावरणा
दिषु॥तत्स्वरःपूजयेद्देवांकेवलेनाशिवेनच॥

पंचावरणपूजांतुप्रारभेतयथाक्रमं॥तिंरेप्रथमा०
दयाश्चेत्रा०॥प्रथमावरणंप्रोक्तंद्वितीयावरणं
शृणु॥भवःशर्वस्तथेशानोरुद्रःपशुपतिःशिवः॥
उग्रोभीमोमहादेवःशंकरश्चत्रिलोचनः॥स्व
स्वशक्तिसमायुक्ताद्वितीयावरणेस्मृतः॥शक्र
यश्चपुरारणीतरात्॥भद्रासुरूपावेशानीरौद्री
शिसर्वेश्वरी[illegible]वा॥करालीभद्रकालीचमंगल्या
शांतिरीश्वरी॥अनुक्रमेणतच्छक्तिंतस्यस

र्वाश्चवामनः॥७॥तत्रैवोक्तं॥तथा॥मत्स्यःकूर्मोवराह
श्चनारसिंहश्चवामनः॥रामोरामश्चकृष्णश्चबुधःक
ल्कीचतेदश॥ईशानतइति॥तथा॥द्वितीयावरणे
प्रत्याःपूर्वादिपरिक्रमात्॥सनत्कुमारःसनकः
सनंदनश्चसनातनः॥तथा॥इतिहासपुराणानि
द्वितीयावरणेपुनः॥६॥वैदिक्योनिखिलाविद्या
धर्मशास्त्रपुरःसराः॥ईशानतःसमारभ्यपूज्याए
वनसीशायः॥अथपुराणनामानि॥मार्कंडेयगारुडं

१०

विष्णुमाग्नेयंलैंगींचवामनं॥मत्स्यंभागवतंवायुंब्रह्मां
डंकूर्मंपद्मकं॥ब्रह्मवैवर्तकंस्कांदंवाराहंब्रह्मनार
दं॥तथिष्योत्तरमेतानिपुराणानीतिनामतः॥त
थाचद्वादशादित्यान्द्वितीयावरणेयजेत्॥आ
दित्यनामान्यादित्यपुराणात्॥धातार्यमाचमि
त्रश्चवरुणोंऽशुर्भगस्तथा॥इंद्रोविवस्वान्पूषाप
र्जन्योदशमःस्मृतः॥ततस्त्वष्टाततोविष्णुरा
दित्याद्वादशस्मृताः॥तथा॥सप्तछंदोमयांश्चैव

वालखिल्यांश्चपूजयेत्॥गायत्र्युष्णिगनुष्टुप्बृहपह
तिपङ्क्तित्रिष्टुप्जगत्यतिश्रीदीप्ती॥तपोऽप्यो
प्नीतथाप्रज्ञीमेधासिद्धांचवैजयेत्॥तथा॥
दीप्तास्तुकलानयानुद्राविन्नतिर्विमलाक्रमात्॥
अमोघाविद्युताचैवषष्ठ्यादिक्रमसंस्थिताः॥ ११
द्वितीयावरणेपूज्याइति॥दयाधेवेत्रा०॥अथ
तृतीयावरणे॥शिवपुराणात्॥महादेवःशि

वोरुद्रःशंकरोनीललोहितः॥ईशानोविजयो
भीमोमहेशानोभवोद्भवः॥कपालीशश्चकथ्यं
तेतथैकादशाक्रमः॥महेश्वरीशुनादुर्गा
सौम्याकालीतथेश्वरी॥जयाजयीवरीदेवी
भवानीच॥कपालिनीशक्तिभिःसहपूज्यंते
ऐतरीतरतःक्रमात्॥रुद्राइतिशेषः॥अ
थगणपाः॥उमाचंडेश्वरीनंदीमहाकालो

गणाधिपः॥वृषभोभृंगरीटिश्चस्कंदश्चेत्येवमादिरु
द्रगणाः॥तत्रतुमासुतौगणेशस्कंदौपुष्पदंतःकप
र्दीभैरवावेतेपूर्वस्यां॥तथारुद्रविधाने॥ईशान्या
मीश्वरःप्रोक्तःपूर्वस्यांनंदीएवच॥आग्नेय्यांचमहा
कालोदक्षिणेभृंगिरिटस्तथा॥भृंगिरिटिश्चनैर्ऋ १२
त्यांवारुण्यांवृषभोमतः॥स्कंदोवायुदिशिप्रोक्तः
कपर्दीचधनाध्यक्षउत्तरस्यांप्रकीर्त्तिति॥तथा॥